## तृतीयो वर्गः

6. अधोलिखितयोः सन्दर्भनिर्देशपूर्वकं व्याख्या विधेया- 7½

(क) आशावशाः स्वर्मनसः सुखैषिणो

हित्वा च धान्यं स्वजनान् धनं तथा।

नित्यं तपस्तच्च तपन्ति दुष्करं

दुर्मार्गमारूह्य च यान्ति दुर्गतिम् ।।

(ख) सङ्कल्पमात्रेण जगन्ति यस्य प्रादुर्भवन्ति प्रलयञ्च यान्ति।

प्रपन्नसन्त्राणकृतावतारः श्रीमान् स पात्वम्बुजलोचनो वः।।

7. प्रसङ्गपुरस्सरं व्याख्या कार्या- 7½

(क) कालिदासनिरूपिता विन्ध्यपादे नर्मदा

अमरकण्टकनिसृता सर्वदा या निर्मदा।

स्फटिकधवला निस्तुला तुङ्गविपुलास्ताः शिलाः

तन्वते त्वस्याः श्रियं सा नदीयं नर्मदा।।

(ख) पश्यामि दुष्टानलसान् महोदरान्

तान् दुष्कुलीनांश्च कुरूपिणो नरान् ।

युक्तैस्त्वया यैरधमैरहर्निशं

दासीक्रियन्ते समुदात्तमानसाः।।

## चतुर्थो वर्गः

8. 'सुधाभोजनम्' नाटकस्य साराशं संक्षेपेण वर्णयत। 7½

9. 'रोटिकालहरी' पाठस्य समीक्षा विधेया। 7½





**Roll No. ____________**

# A-176

## बी. ए. (तृतीयवर्षम्) परीक्षा, 2015

## संस्कृतम्

### तृतीयप्रश्नपत्रम्

### (अद्यतन संस्कृतसाहित्यम्)

**समयावधिः : घण्टात्रयम्** **पूर्णाङ्कः : 50**

**निर्देश :** **पञ्च** प्रश्नाः समाधेयाः। **प्रथमः प्रश्नोऽनिवार्यः**। प्रतिवर्गम् **एकैकः** प्रश्नोऽवश्यं समाधेयः।

1. अधोलिखितानां लघूत्तराणि लिख्यन्ताम् - 2×10=20

(क) शक्रकन्याः

(ख) सूत्रधारः

(ग) राज्ञी दुर्गावती

(घ) भरतवाक्यम्

(ङ) मातलिः

(च) बालीविच्छित्तिः

(छ) सुरभिपाटलम्

(ज) तिरूपतितीर्थम्

(झ) प्रो.श्रीनिवास-'रथः'

(ञ) जयतु मम स्वातन्त्र्यसरणिः

## प्रथमो वर्गः

2. प्रसङ्गनिर्देशपूर्वकं व्याख्या विधेया - 7½

(क) महिषीं नृपो, हयपञ्च सा, सोऽप्यथ कुलालकुमारिकाम् ।
सा चापि भर्तृहरिं व्रजेद् भगवन् ! किमत्र विधीयताम् ।।

(ख) निर्धनास्ते जनाः कामयन्ते सदा
तां तथा बालकाश्च क्षुधापीडिताः।
आद्रियन्ते भ्रशं तत्र ते कर्षिता
कर्षका कर्मजीवाः श्रमैकव्रताः।।

3. प्रसङ्गनिर्देशपूर्वकं द्वयोः श्लोकयोः अर्थः विधेयः- 7½

(क) बाला न सा वरतनुर्न च सुन्दरी या
नौ सुन्दरी न खलु पार्वणचन्द्रवक्त्रा।
चन्द्राननाऽपि न च सा न च या मृगाक्षी
नासौ न या रूचिरबिम्बफलाधरोष्ठी।।

(ख) विपत्रितेयं जीवनलतिका
केवलकुटिलकण्टकाकुलिता।
दूरे कुसुमकथा।
सूर्ये तपति तमिस्रा प्रभवति
भवतिनयनमयथा।।





## द्वितीयो वर्गः

4. प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या- 7½

(क) वह्निस्फुलिङ्गकलिते ह्यसिचालने सा
मल्लाजिमल्लदमनेऽखिलशस्त्रशास्त्र।
नीतौ च राजनयदण्डनये हयोढे
पारङ्गता किल बभूव च लक्ष्मिबाई।।

(ख) वास्यमीशा यदास्ते जगत्यां जगत्
त्यागभावैरतो भोग्यमास्ते सदा।
गृध्नवः किन्तु ये भौतिकत्वेरता-
स्तन्मनो भारतीयं कथं कल्पताम् ।।

5. प्रसङ्गनिर्देशपूर्वकं अर्थः विधेयः - 7½

(क) कुङ्कुमारञ्जिता रम्यकश्मीरभूः
स्वर्गभूमिर्जनैरूच्यते या पुरा।
अद्य सैवावनी रक्तधाराधुनी
नैव यूकस्तु कर्णेषु नो रिङ्गति।।

(ख) अश्मखण्डे समे रेलमार्गे क्वचिद्
राजमार्गे च यात्रा कृता केवलम्।
नानुभूतः श्रमो यैर्हि तन्निर्मितौं
तन्मनो भारतीयं कथं कल्पताम्।।